*Journal of Advances and Scholarly Researches in Allied Education*

*Vol. VII, Issue No. XIII, January-2014, ISSN 2230-7540*

REVIEW ARTICLE

# प्राचीन-भारतीय-संस्कृतौ वर्णव्यवस्था

AN INTERNATIONALLY INDEXED PEER REVIEWED & REFEREED JOURNAL

www.ignited.in

# प्राचीन-भारतीय-संस्कृतौ वर्णव्यवस्था

**Maya Yadav***

Lecturer (Sanskrit) Govt. Sr. Sec School, Nahar, Haryana

---------------------------------x---------------------------------

वृञ् वरणे धातोः निष्पन्नस्य वर्णशब्दस्य अर्थः भवति वरणं वरणकरणं वेति । वरणार्थकवृञ्धातोः प्रेरणार्थक वर्णधातोथ अस्य शब्दस्य निष्पत्तिः भवति । अस्य 'वर्ण'पदस्य अर्थः रङ्गः, रूपरङ्गो वा भवति । यथा भवान् जनाति एव वर्णशब्दस्य अत्र सामान्यः अर्थः जातिः भवति । परन्तु प्राचीने काले रङ्ग एव अभिप्रेतार्थः आसीत् । अयं ब्राह्मण-क्षत्रिय-वैश्य-शूद्रात्मकः चतुर्विधः भवति । एतेषां वर्णानां या दशा, निर्धारितो नियमः विधानं वा भवति, तदेव 'वर्णव्यवस्था' नाम्ना व्यवहता भवति । वि अवस्था इत्यस्मिन् पदे 'आतश्चोपसर्गे' इत्यङ् ततः टाप्- इति 'व्यवस्था' शब्दस्य निष्पत्तिः भवति । यस्यार्थः शास्त्रनिरूपितः विधिः भवति । "निवर्त्तितानि कर्माणि व्यवस्थापूर्वकं बुधैः" इति । व्यवस्था नाम नियमः –

**"एवं कृतगुहारक्षो महारत्नानि शङ्करः ।**

**उत्पाद्य भगवाँस्तत्र व्यवस्थामादिदेश सः ।।"**

शतपथब्राह्णे विद्दते यत् 'चत्वारो वै वर्णाः' (५/५/४/१)। जातिबोधकस्य वर्णशब्दस्य अर्थः रङ्गः प्रकाशः इति ऋग्वेदे वर्णितोऽस्ति । "उभौ वर्णा ऋषिरुग्रः पुपोष" १/१७/१६)। लोके यन्मानवस्य चर्म कृष्णं श्वेतं (धवल) वा विद्दते स एव वर्णपदेन ज्ञायते । अर्थात् वर्णभेदो हि नाम रङ्भेदः इति अभिप्रेऽस्ति । भवान् जानाति एव यत् पुरा आर्य-अनार्ययोः वर्णः परस्परं भिन्नः आसीत्, अनोयोः चर्म-रंग-पूजापाठविधान-स्वरूपभाषादयश्च सर्वे भिन्नः-भिन्नः आसान् ।

ऋग्वेदे यद्दपि ब्राह्मणक्षत्रियादीनां शब्दानां प्रयोगः विद्दते, परन्तु तत्र 'वर्ण' पदार्थेन सह तेषां न कोऽपि सम्बन्धः । पुरुषसूक्तेऽपि ब्राह्मण-राजन्य-वैश्य-शूद्राणां शब्दानां प्रयोगः प्राप्यते । किन्तु तत्रापु 'वर्ण' शब्दः नास्ति, तथापि तस्य वर्णपदस्य प्रयोगः अस्मिन् अर्थे अभिप्रेतार्थः एव । 'वर्ण'-'जाति'-शब्दौ समानार्थकौ प्रतीयेते ।

वर्णव्यवस्था विविधरूपा सती प्रायशः सर्वेषु देशेषु कालेषु च प्रचरन्तीव प्रतिभाति । यथा अधुनापि अफ्रीकादेशवासी कृष्णः आंग्लदेशवासिश्चेतपुरुषाद् भिन्न इव दृश्यते । तथैव पुरा भारतवर्षेऽपि आसीत् । मूलतो वर्णस्यार्थो रङ्ग एव तथापि तदाधारेण पुरा कर्मरङ्गानुसारेण याः जातयः कल्पिताः परवर्तिनि काले ताः एव जन्मना परिणताः । विभाजनस्येयं प्रक्रिया वर्णव्यवस्थेति प्रथिता । कालान्तरे व्यवसायानुरूपं गुणयोग्यतानुरूपं व्यक्ता भवति । प्रारम्भिके युगे सर्वेऽपि मानवा ब्राह्मणादिकुलरहिताः एकवर्णा भवन्तीति निःसन्दिग्धमेव । कालान्तरे विविधा वर्णाः कर्मक्रियाविशेषेण संजायन्ते । महाभरते यथा-

**"एकवर्णमिदं पूर्वं विश्वमासीद्दुधिष्ठर ।**

**कर्मक्रियाविशेषण चतुर्वर्णं प्रतिष्ठतम् ।।"**

भरते पुरा आर्या आर्यातराश्चासम् । गौरवर्णानाम् आर्याणां कृष्णवर्णानाम् अनार्याणां च परस्परं सम्मेलनभवत् । तस्मादेव कालादारभ्य वर्णानुसारेण वर्णव्यवस्था समारब्धा । आर्यः अनाश्र्च द्वौ वर्णौ गौरकृष्णौ बभूवतुः । अनयोः कतिपयजनवर्गा अपरस्य संस्कृति यथारुचिं स्वूकृत्वन्तः । अनयोः परस्परं सास्कृतिकेन सम्मिलनेन पुनरपि गुणकर्मविभागशः वर्णव्यवस्था दृढीभूता । स्वाभविकः शाश्चतिकश्चायं विभागविधिः ।

भारतीयसमाजो वैदिकयुगे चातुर्वर्ण्यव्यवस्थाभिः सङ्घटितः । कस्यचिदपि परुष्स्य जातिः तस्य गुणकर्मणोः विपरिवर्त्तनेन तस्मिन्युगे परिवर्त्तते स्म । यदि सुराः असुरभाषायाः प्रयोगं कुर्वन्ति स्म, तर्हि तेऽपि असुराः बभूवुः । अश्वमेधविद्दां एजानन्तो ब्राह्मणकुलोत्पन्ना अपि जनाः ब्राह्मणत्वात् च्युताः भवन्ति स्म । छान्दोग्योपनिषदि तु मरण़ान्तरे जातिपरिवर्त्तनस्य सिद्धान्तः प्रतिपादितः । महाभारतयुगेऽपि प्रायो वृत्तयाचारानुसार्ण वर्णपरिवर्त्तनं प्रकल्पितम् ।

शोभनाचारेण शूद्रो ब्राह्मणो भवति । हीनजोतौ उत्पन्नः शूद्रः आगमसम्पन्नो भूत्वा संस्कृतो द्विजो भवति । यथैव नीचवृत्तया ब्राह्मणोऽपि पूर्णरूपेण शूद्रो भवति । जन्मना ब्राह्मणोदिवर्णा न , केवलं गुणचरित्राचारेण ब्राह्मणत्वस्य सिद्धर्भवति स्म । अस्यां दशायां क्यचित्पुरुशस्य स्वजीवनकाले हि पुनः पुनः जाति परिवर्त्तनं सम्भवति । स्म । बहवः स्मृतिकारा अपि जातिपरिवर्त्तनं शक्यं इति मन्वते । पुराणानि प्रमाणानि प्रमाणानि सन्त् यत् बहवो ब्रहामणा जातीयकर्मणो विमुखाः सन्तः क्षत्रिया वैश्या वा बभूवुः । प्राचीने युगे निःसन्दिग्धमेव वैश्यानां शिल्पकारिणां शूद्राणां च आधिभौतिकप्रतिष्ठा ब्राह्मणेभ्यः उच्चतरा आसीत् । अस्यां स्थितौ काले काले सामाजिकपरिवर्तनेन सहैव वर्णव्यवस्था अपि प्रभाविता बभूव । वस्तुतः इयं वर्णव्यवस्था भरतस्य निसर्गतः आत्मा भवति, प्राणस्वरूपा भवति । अत एवोक्तम्-

**"चातुर्वर्ण्यव्यवस्थानं यस्मिन्देशे न विद्दते ।**

**तं म्लेच्छदेशं जानीयादार्यावर्त्तस्ततः परम् ।।"**

**वर्णव्यवस्थायाः स्वरूपम्**

मनुष्येषु स्वाभाविकरूपेण चतस्त्रः प्रवृत्तयः भवन्ति । तदनुसारेण एव वर्णव्यवस्था स्थिरीकृता । वर्णव्यवस्थानुसारेण मनुष्यस्य प्रवृत्तयानुकूल्येन च तज्जातेःझ नामकरणं जातमासीत् । साङ्ख्यमनोविज्ञानस्यानुसारेण क्रमशः सात्त्विक-प्रवृत्तिः ब्राह्मणस्य कृते निर्धारिता जाता, यस्य जीवनं प्रति आध्यात्मिकदृष्टिरेव आसीत् । सत्त्व-रजोगुणाभ्यां सम्मिश्रणं क्षात्रप्रवृत्तै आसीत्. अतः स क्षत्रियः संजातः । रजोगुण-तमोगुणयोः प्रबलता वैश्यवृत्तैः अन्तर्गता आसीत् । तथैव तमोगुणस्य प्रबल्यं यस्मिन् वर्णे आसीत् स एव शूद्रनाम्ना कथितः । अतः एतद् विभाजनं वैज्ञानिकम् आसीत् । मानवीयप्रवृत्तेः आधारे पूर्णतः मनोवैज्ञानिकदृष्ट्या इयं वर्णव्यवस्था आसीत् । सा च समाजस्य सुव्यवसथायै जातावपि उपजातयः आगताः । अधुना सैव जातिव्यवस्था सामाजिक-पार्थक्यस्य जन्मदात्री अपि अभूत् ।

आधुनिकी एतादृशी वर्णव्यवस्था पुरा नासीत्, किन्तु वर्णः व्यवस्था च आस्ताम् किञ्चिद् भिन्नरूपेण । यथा एकस्यैव पितुः एकः पुत्रः ब्राह्मणधर्मस्य पालनं करोति स्म, अपरः क्षात्रधर्मस्य । एकः पुरोहितः भवति स्म, अपश्च राजा । यथा देवापिः, शन्तनुः (ऋष्टिषेणस्य पुत्रौ) प्रभृतयः । ऋग्वेदे 'कारू स्वकीयाम् अभिलाषाम् अभिव्यनक्ति यत् मम माता चक्र्यां (यन्त्रपेषण्यां) गोधूमचूर्णं करोति किं वा चूर्णपेषिणः करोति, पिता भषक् अस्ति, तद्वदेव वयमपि विभिन्न-क्रियाभ्यः धनोपार्जनं कर्तुं अभिलाषिणः भवामः-

**"कारूरहं तातो भिषगुपपेषिणी माता ।**

**नानधियो वसूयवो अनुगा इव तस्थम् ।।"**

तैत्तिरीयब्राह्मणे यत्र ब्राह्मणशूद्र्योः वर्णयोः चर्चा विद्दते, तत्र अनयोः कृते क्रमशः दैवीवर्णस्य तद्भिन्नवर्णस्य च व्यवहारः कृतोऽस्ति । एतरेयब्राह्मणे लिखितमस्ति यत् शूदं विहाय शेषवर्णान् ब्राह्मण-क्षत्रिय-वैश्यान् क्रमशः गायत्री-त्रिष्टुप्-जगती-छन्दोभिः प्रजापतिरुत्पादयामास । पुरुषसूक्तानुसारेण ब्राह्मणस्योत्पत्तिः विराट्पुरुषस्य मुखात् जाता, क्षत्रियस्य (राजन्यस्य) बाहुद्वारा, वैश्यस्य जङ्घाद्वारा, शूद्रस्य पादतः इति । श्रीमद्भगवद्गीतायाम् अपि एतेषां वर्णानां चर्चा विद्दते – "चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः । अनेन ज्ञायते यत् वर्णव्यवस्था न आधुनिकी विद्दते, अपितु प्राचीना ईश्वरेण निर्मितास्ति ।

गीतायाः "गुणकर्मविभागशः" इत्यस्य अयमेन अयम्व अभिप्रायो यत् एतेषां वर्णानां विशेषधर्माः सन्ति । वेदाध्ययनं, यजनं, दानं च ब्राह्मणक्षत्रियवैश्यानां त्रययाणामेव कर्त्तव्यम् भवति । अस्मात्कारणादेव एते वर्णाः द्विजाः भवन्ति । धर्मशास्त्रवेषु अपि एतेषां कृते केषांचिन्नियमानाम् उपनियमानां व्यवस्था कृता वर्त्तते । केचन एतादृशाः विशेषाधिकाराः अपि सन्ति ये कस्यापि एकस्य वर्णस्य अधीने भवन्ति । केचन ब्राह्मणस्य कृते, केचन क्षत्रियस्य कृते, केचन अङ्काराश्च वैश्यस्य कृते आसम् । वेदाध्ययनं, पैरोहित्यं यजनं दानं च ब्राह्मणानां कृते । युद्धकरणं, प्रजासंरक्षणं च क्षत्रियाणां कृते । कृषिकार्यं, पशुपालनं व्यापाश्च कृते निश्चितकर्माणि आसन् । एवमेव हि शूद्राणां कर्त्तव्यं द्विजानां सेवा, शिल्पकार्यं कृषिकार्यञ्च आसीत् ।

ब्राह्मणादीनां वर्णानां यथा उत्पत्तिः विराट्पुरुषाज्जाता, एतेषां यथा कर्माणि च पृथक्-पृथक् निर्धारितानि सन्त, एतेषु सत्त्व-पजस्तमसां गुणानां वासोऽपि कथितोऽस्ति । विष्णुपुणानुसारेण ब्रहमणः सत्तवगुणसम्पन्नः भवति, क्षत्रियः (राजन्यः) रजोगुणसम्पन्नः, वैश्यस्तु पजस्तमोगुणाभ्यां युक्तः भवति, किन्तु शूद्रः तमोगुणप्रधान एव ।

चतुर्णां वर्णानाम् उत्पत्तिः एकेन पुरुषेण जाता, तथापि एते स्वरुपतः भिन्नः सन्ति । अग्नि-इन्द्र-विश्चेदेव-पूषा इत्येतेभ्यः प्राणस्वरूपेभ्यः क्रमशः ब्रहमणक्षत्रियवैश्यशूद्रवर्णानाम् उत्पत्तिरभवत् । अतः ब्रहमणवर्णस्य आत्मा अग्निप्रधानः जातः, क्षत्रियः इन्द्रस्य शौर्यादिभावं बिभर्ति, वैश्यानां व्यवसायः विश्वानुसारी भवति, शूद्राश्च सेवया समाजं पोषयन्ति ।

**उद्भवः विकासश्च**

भारतीयसमाजस्य महती विशेषता भवति वर्णव्यवस्था । इयं व्यवस्था अत्न्तप्राचीनकालाद् विद्दमाना विद्दते । वस्तुतः आदिकाले अस्याः प्रथायाः निर्माण ईश्वरेण कृतम् ।

**"ब्रहामणोऽस्य मुखमासीद् बाहू राजन्य कृतः ।**

**ऊरू तदस्य तद्वैश्यः पद्भ्यां शूद्रो अजायत ।।"**

आर्थात् विराट्पुरुषात्मरूपिण ईश्वरस्य मुखात् ब्राहमणानां जन्म अजायत, बाहुभ्यां क्षित्रियस्य, ऊरुयुगलात् वैश्योत्पत्तिः जाला एवं च पद्भ्यां शूद्रो अजायत । अत एव चत्वारो वर्णाः आसन् । किन्तु न जन्मना, तदा तु कर्मणा एव एतेषां वर्णानां सृष्टिः लिखितमस्ति "जन्मना जायते शूद्रः संस्कारात् द्विज उज्यते" अर्थात् कोऽपि मनुष्यः जन्मतः न कस्यापि वर्णस्य भवेत्, संस्कारदेव स वर्णेषु परिगणितः भवेत् ।

ऋग्वैदिककाले अस्या वर्णव्यवस्थायाः जातिव्यवस्थायाः वा उल्लेखः न दृश्यते । वर्णः आसीत्, आर्य-अनार्यै अपि आस्ताम् । किन्तु तौ आर्यानार्यौ गौरकृष्णौ भूत्वापि जातिवाचकौ नास्ताम् । वर्णव्यवस्था जातिव्यवस्थारूपेण केवलं आर्येषु एव समुद्भूता विकसिता च ।

ऋग्वेदे कारू कथयति मम पिता वैद्योऽस्ति, माता चाऽस्ति पेषिणी, अहं च कविः । अर्थात् एते आर्याः आस्न् । आर्येषु अयम् एकः वर्गः पेषिणी-वैद्द-कवीनां आसीत् । समाजे सामाजिकसुरक्षायै, आर्थिकावश्यकताऽनुसारेण वर्गनिर्माणं सदैव भवतीति भवान् जानाति एव । एवं हि एकः वर्गः पुरोहितस्याऽपि आसीत्, यः यज्ञं कारयति स्म । यज्ञसम्बन्धिनाम् आवश्यकतानां पूर्त्तिः स एव करोति स्म । यथा धार्मिक-शैक्षिक-आवश्यकतायाः पूर्त्तये ब्रहमणवर्गस्य उत्पत्तिः जाता, तथाव समाजस्य सुरक्षायै, नूतराज्यनिर्माणाय च बलशालिनां, युद्धप्रियजनानामपि एकः वर्गः स्थआपितोऽभूत् । अस्मिन् वर्गे क्षत्रियः (सैनिकः) आसीत् । क्षत्रियाणां पार्श्वे अस्त्र-शस्त्राण आसन् । रथ-अश्व-गजादयः आसन् । अस्यैव पार्श्वे शासनतन्त्रमपि आसीत् । क्षत्रियस्य पुत्रः क्षत्रियकर्मणि नियुक्तोऽभूत, कालान्तरे अयमेव नियमः सञ्जातः । ब्रहमण-क्षत्रिय वर्गामासीत् । शनैः शनैः अस्मिन्नपि वर्गे वंश-परम्परा स्थापिता । तदनन्तरं अस्यापि वर्गस्य अस्तित्वं पृथक् सञ्जातम् । वैवाहिकसम्बन्धोऽपि स्वतन्त्रः सञ्जातः चतुर्थः वर्गः यः पुरा आसीत् स एव कालान्तरे शूद्रवर्णे परिवर्त्तितः ।

यद् विभाजनं पुरा गुणकर्मविभागशः आसीत्, तदेव कालान्तरे जन्मना जातिपूपेण परिणतं जातम् । ब्रहमणयुगे या वर्णव्यवस्था आसीत्, तया व्यवस्थया एव जातीनां विभिन्ननां उपजातीनां च सूत्रपातः सञ्जातः । ब्रहमणक्षत्रियादयः कालान्तरेण विभिन्नाषु उपजातिष्वपि विभक्ताः ।

यथा ब्रहमणु केचन चतुर्वेदिनः आसन्, केचन त्रिवेदिनः, केचन द्विवेदिनः, अपि आसन् । क्षत्रिये सूर्यवंशी, चन्द्रवंशी, यदुवंशी इत्याद्दाः उपजातयः आसन् । एवंक्रमेण वंश-धर्म-व्यवसायानाम् आधारेषु जातीनां विकासः जातः । तक्षानापित-पजक-कुमभकार-स्वर्णकारदीनाम् उपजातीनां विकासः व्यवसायस्यैव आधारेण सञ्जातः । जैनबौद्धचार्वाकादीनां विकासः यः आधारः आध्यात्मिकः आसीत्, स एव कालानतरे भौतिकोऽभूत् । अनन्तरं स एव धर्मगत-वंशगत-व्यवसायगतश्चापि समभूत् ।

**चत्वारो वर्णाः कर्त्तव्यानि च**

अतीन्द्रियतत्तद्रष्टारः भारतीया ऋषयः वर्णव्यवस्थाप्रसङ्गे सुतरां वैज्ञानिकाः वर्त्तन्ते । राष्ट्रस्य समाजस्य च कृते, जीवनादर्शस्य चिन्तनं कुर्वन्तः ते समाजस्य कर्त्तव्यभूमिं निर्धारयन्ति ।

इयं वर्णव्यवस्था कर्मणा तु सकलेऽस्मिन् विश्वे दृष्यते, जन्मना अपि महीयसी वर्त्तते । भारतीया ऋषयः वर्मव्यवस्थायाः गमभीरतां न केवलं कर्मणा, जन्मनापि साधयन्ति । ऋषिभिः न केवलं मानवसमाजे एव अस्याः वर्णव्यवस्थायाः साक्षात्कारः कृतोपितु तेषां मते वृक्षेषु पलाशः ब्राहमणः भवति – "ब्रहम वै यत् पलाश"'(शतपथ-५/३/५/१३) । तथैव पशुषु अश्वः क्षत्रियः – 'क्षत्रं वा अश्वः' (तै.बा. ३/१/६०/१), धातुषु हिरण्यं – 'क्षत्रस्यैतद्रूपं यद्धिरण्हम्'(शत. १२/२/२/१७) । एवमेव हि वैश्य-शूद्रयोः प्रसङ्गे अपि बहूनि वचनानि श्रुतिषु विद्दन्ते । यत्र चन्द्रमसः आत्मा ब्रहमणः, तस्मात् प्रकाशः शान्त- आनन्दवर्धकः, तत्रैव सूर्यस्य आत्मा क्षत्रियः बवति । तस्मादेव कारणात् तस्य प्राकाशेऽपि प्रखरता, असहयता च विद्दते । पृथ्वीमण्डलस्य आत्मा वैश्यः भवति, सम्पत्तिरूपअन्नादयः असमादेव प्राप्यन्ते । अस्मिन्मण्डले ये पशु-तृण-ओषधयः उत्पन्नाः भवन्ति तेषाम् अधिष्ठाता शूद्राः एव । अतः इयं वर्णव्यवस्था सृष्टिव्यापिनी वर्त्तते ।

**कर्मणा वर्णाः**

तैत्तिरियब्राहमणानुसारेण (१/२/६) द्वावेव वर्णौ आस्ताम् दैवीवर्णः असूर्यवर्णश्व । दैवीवर्णो नाम ब्राहमणः, असूर्यवर्णो

नाम शूद्रः । केषाञ्चिन्मते दैवीवर्णः आर्यः असूर्यवर्णः दासः दस्युर्वा । दस्योः किवा दासस्य बहवः भेदाः आसन् । अर्थात् आर्य-दासयोः भाषा-रूप-चर्म-रङ्ग-पूजाविधानादि सर्वं भिन्नं-भिन्नम् आसीत्, इमौ परस्परं विरोधी आस्ताम् । ब्रह्मणसाहित्यकाले ब्रह्मणसाहित्यकाले ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणां जातिनिर्धारणं कर्मणा जातम् ।

**ब्राह्मणः –** "जन्मना जायते शूद्रः संस्कारद्द्वनज उज्यते । वेदपाठाद् भवेद्विपेरो ब्रह्म जानाति ब्रह्मणः ।।" वेदाध्ययनं, वेदाधेयापनं, यजनं, याजनं,दानं प्रतिग्रहश्च एते षट्कर्माणि ब्रह्मणस्य भवन्ति । तेषु अध्यापानं याजनं प्रतिग्रहश्च विशेषाधिकारा सन्ति ।

**क्षत्रियः-** वेदाध्ययनं, यजनं दानञ्च त्रीण कर्माणि क्षत्रियस्य । युद्धकरणं प्रजासंरक्षणं क्षत्रियस्य विशेषाधिकारः ।

**वैश्यः –** वेदाध्ययनं, यजनं, दानञ्चेति त्रीणि कर्माणि वैश्यस्य । कृषिः, पशुपालनं, व्यापारादयः वैश्यस्य विशेषाधिकारः ।

**शूद्रः –** द्विजातीनां ब्रह्मणक्षत्रियवैश्यानां सेवाशुश्रषा शूद्रस्येतरेषां वर्णानाम् । पूर्वस्मिन्पूर्वस्मन् वर्ण नःश्रेयसं भूयः । परिचर्या चोत्तरेषाम्, तेभ्यो वृत्तिं लिप्सेत । तत्र पूर्व परिचरेत् ।" इति आपस्तम्बगौतमादयः ।

**जन्मना वर्णाः**

वर्णव्यवस्थां केचन जन्मना स्वीकुर्वन्ति । परन्तु ये जन्मना स्वीकुर्वन्ति, तेऽपि गुण-कर्मणेः अनिवार्यतां स्वीकुर्वान्ति एव । स्वयं मनुः कथयति – यथा काष्ठनिर्मतो गजः अथवा चर्ममयः मृगः नाममत्रेण गजः मृगो वा भवतः, तथैव अध्ययनाध्यापनहीनः ब्रह्मणोऽपि (आचरणहीनो) नाममात्रेणैव ब्रह्मणः भवति- "यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः । यश्च विप्रोऽनधीयानस्त्रयस्ते नामधारकाः ।।" उभाभ्यां पक्षाभ्यां ब्रह्मणादीनां कर्मणां महत्त्वं समानमेव, संस्कारस्यापि महत्त्वं समानमेव स्वीकृतम् । वर्णव्यवस्थायां कर्त्तव्यस्य गुरुतया सह अधिकारस्यापि गुरुता स्वीकृता ।

वर्णनां पारस्परिकेन सौहार्देन एव समाजस्य सर्वाङ्गीणसमुन्नतिः सम्भवति, सर्वत्र शान्तिश्च विराजते । प्राचीनकाले यदि समुन्नतजातीनां चारित्र्यबलेन सर्वत्र प्रतिष्ठा आसीत्तर्हि वैश्यशूद्राणाम् अधिभौतकसमृदध्या समाजे समादरणीयं पदम् अविद्दत । प्रथमं तावत् अनुलोमविवारहीत्या एव पारस्परिकसम्बन्धो दृढतरो बभीव । इमे अनुलोमविवाहाः केवलमपवादरूपाः एव नासम्, अपितु सम-द्विशालिभिरपि महापुरुषैः विविधवर्णोत्पन्नाः कन्यका अनुलोमरीत्या परिगृहीताः। सर्वेषां वर्णानां कार्यं भिन्नं-भिन्नम् आसीत्, तेनापि पारस्परिकस्य सम्बन्धस्य दृढतरं प्रमाणं प्राप्यते ।

**जातयः**

चत्वारो वर्णाः चतसृणां जातीनां रूपेणापि परिगण्यन्ते । कालान्तरे शतसङ्ख्याका उपजातयः प्रादुर्भूताः । येन सिद्धान्तेन चतुर्वर्णा व्यवस्थिताः, तेनैव जात्युपजातीनामपि व्यवस्था अभवत् । आदौ व्यवसायानुरूपं पित्रोर्जात्यनुरूपं च वर्णानां सहघटनं अक्रियत । प्राचीनकाले व्यवसायानां सह्ख्या अगणिता एव । यज्ञविधी हि षोडशपुरोहिताः षोडशविधकार्योषु नियुक्ताः आसन्, तेषां पद-प्रतिष्ठा अपि न समाना । वैस्यानामपि व्यवसायाः निर्धारिताः, तत्रापि केचन कृषिकार्यसंलग्नाः.केचन पशुपालने, केचन वाणिज्ये । शूद्राणमपि असङ्ख्यानि शिल्पानि आसन्, तत्र प्रतिशिल्पम् एका जातिः । पुनश्च कालान्तरे अनुलोम-प्रतिलोमविवाहैः वर्णसङ्कराणामुत्पत्तिः जाता । तेषां नवानि नामानि प्राप्यन्ते अथवा पुरातनेषु उपजातिषु अन्तर्भावो दृश्यते । ते यथा – मूरधावसिक्तः, महिष्यः, पारशवः, अमबष्ठः, निषादः, मागधः, चाण्डालः कांस्यकारः, कुम्भकारः, चर्मकारः, काष्ठकारः, शूर्पकारः,प्रैषकारः,तैलिकः, कैवर्त्तः, नटः, रजकः, तन्तुवायप्रभृतयः च अत्र भवन्ति स्म।

---

**Corresponding Author**

**Maya Yadav***

Lecturer (Sanskrit) Govt. Sr. Sec School, Nahar, Haryana

**E-Mail –**